# Apamarjanastotram 2 Mahimasahitam

# અપામાર્જનસ્તોત્રમ્ ૨ મહિમસહિતમ્

## Document Information

Text title : Vishnu Apamarjana Stotram 2

File name : viShNorapAmArjanastotram2.itx

Category : apAmArjana, vishhnu, vishnu

Location : doc_vishhnu

Transliterated by : NA

Proofread by : NA

Source : padmapurANa uttarakhaNDa (6) adhyAya 78/79 and its importance in 79/80th. Also similar in Vishnudharmottarapurana Vishnurahasya.

Latest update : December 26, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2023

*sanskritdocuments.org*

# અપામાર્જનસ્તોત્રમ્ ૨ મહિમસહિતમ્

અથોનાશીતિતમોઽધ્યાયઃ ।
મહાદેવ ઉવાચ -
અથાતઃ સંપ્રવક્ષ્યામિ અપામાર્જનમુત્તતમ્ ।
પુલસ્ત્યેન યથોક્તં તુ દાલભ્યાય મહાત્મને ॥ ૧॥

સર્વેષાં રોગદોષાણાં નાશનં મઙ્ગલપ્રદમ્ ।
તત્તેઽહં તુ પ્રવક્ષ્યામિ શૃણુ ત્વં નગનન્દિનિ ॥ ૨॥

પાર્વત્યુવાચ (શ્રીદાલભ્યૌવાચ) -
ભગવન્પ્રાણિનઃ સર્વે વિષરોગાદ્યુપદ્રવાઃ ।
દુષ્ટગ્રહાભિભૂતાશ્ચ સર્વકાલે હ્યુપદ્રુતાઃ ॥ ૩॥

અભિચારકકૃત્યાદિબહુરોગૈશ્ચ દારુણૈઃ ।
ન ભવન્તિ સુરશ્રેષ્ઠ તન્મે ત્વં વક્તુમર્હસિ ॥ ૪॥ (ન ભવન્તિ મુનિશ્રેષ્ઠ)

મહાદેવ ઉવાચ (શ્રીપુલસ્ત્ય ઉવાચ) -
વ્રતોપવાસૈર્નિયમૈર્વિષ્ણુર્વૈ તોષિતસ્તુ યૈઃ ।
તે નરા નૈવ રોગાર્તા જાયન્તે નગનન્દિનિ ॥ ૫॥ (જાયન્તે મુનિસત્તમ)

યૈઃ કૃતં ન વ્રતં પુણ્યં ન દાનં ન તપસ્તથા ।
ન તીર્થં દેવપૂજા ચ નાન્નં દત્તં તુ ભૂરિશઃ ॥ ૬॥

તે વૈ લોકાઃ સદા જ્ઞેયા રોગદોષપ્રપીડિતાઃ ।
આરોગ્યં પરમામૃદ્ધિં મનસા યદ્યદિચ્છતિ ॥ ૭॥

તત્તદાપ્નોત્યસન્દિગ્ધં વિષ્ણોઃ સેવાવિશેષતઃ ।
નાઽઽધિં પ્રાપ્નોતિ ન વ્યાધિં ન વિષગ્રહબન્ધનમ્ ॥ ૮॥

કૃત્યાસ્પર્શભયં ચાપિ તોષિતે મધુસૂદને ।
સમસ્તદોષનાશશ્ચ સર્વદા ચ શુભા ગ્રહાઃ ॥ ૯॥

દેવાનામપ્યધૃષ્યોઽસૌ તોષિતે ચ જનાર્દને ।
યઃ સર્વેષુ ચ ભૂતેષુ યથાઽઽત્મનિ તથાઽપરે ॥ ૧૦॥

ઉપવાસદિનાન્તે તુ તોષિતો મધુસૂદનઃ ।
તોષિતે તત્ર જાયન્તે નરાઃ પૂર્ણમનોરથાઃ ॥ ૧૧॥

અરોગાઃ સુખિનો ભોગભોક્તારો નગનન્દિનિ ।
તેષાં ચ શત્રવો નૈવ ન ચ રોગાભિચારિકમ્ ॥ ૧૨॥

ગ્રહરોગાદિકં ચૈવ પાપકાર્યં ન જાયતે ।
અવ્યાહતાનિ કૃષ્ણસ્ય ચક્રાદીન્યાયુધાનિ વૈ ॥

રક્ષન્તિ સકલાપદ્ભ્યો યેન વિષ્ણુરુપાસિતઃ ॥ ૧૩॥

પાર્વત્યુવાચ (શ્રીદાલભ્યૌવાચ) -
અનારાધિતગોવિન્દા યે નરા દુઃખભાજિનઃ ।
તેષાં દુઃખાભિભૂતાનાં યત્કર્તવ્યં દયાલુભિઃ ॥ ૧૪॥

પશ્યદ્ભિઃ સર્વભૂતસ્થં વાસુદેવં સનાતનમ્ ।
સમદૃષ્ટિભિરપ્યત્ર તન્મે બ્રૂહિ વિશેષતઃ ॥ ૧૫॥

મહાદેવ ઉવાચ (શ્રીપુલસ્ત્ય ઉવાચ) -
તદ્વક્ષ્યામિ સુરશ્રેષ્ઠે સમાહિતમનાઃ શ ૃણુ । (મુનિશ્રેષ્ઠ)
રોગદોષાશુભહરં વિદ્વિડાપદ્વિનાશનમ્ ॥ ૧૬॥

શિખાયાં શ્રીધરં ન્યસ્ય શિખાધઃ શ્રીકરં તથા ।
હૃષીકેશં તુ કેશેષુ મૂર્ધ્નિ નારાયણં પરમ્ ॥ ૧૭॥

ઊર્ધ્વશ્રોત્રે ન્યસેદ્વિષ્ણું લલાટે જલશાયિનમ્ ।
વિષ્ણું વૈ ભ્રુયુગે ન્યસ્ય ભ્રૂમધ્યે હરિમેવ ચ ॥ ૧૮॥

નરસિંહં નાસિકાગ્રે કર્ણયોરર્ણવેશયમ્ ।
ચક્ષુષોઃ પુણ્ડરીકાક્ષં તદધો ભૂધરં ન્યસેત્ ॥ ૧૯॥

કપોલયોઃ કલ્કિનાથં વામનં કર્ણમૂલયોઃ ।
શઙ્ખિનં શઙ્ખયોર્ન્યસ્ય ગોવિન્દં વદને તથા ॥ ૨૦॥

મુકુન્દં દન્તપઙ્ક્તૌ તુ જિહ્વાયાં વાક્પતિં તથા ।
રામં હનૌ તુ વિન્યસ્ય કણ્ઠે વૈકુણ્ઠમેવ ચ ॥ ૨૧॥

બલઘ્નં બાહુમુલાધશ્ચાંસયોઃ કંસઘાતિનમ્ ।

અજં ભુજદ્વયે ન્યસ્ય શાર્ઙ્ગપાણિં કરદ્વયે ॥ ૨૨॥

સઙ્કર્ષણં કરાઙ્ગુષ્ઠે ગોપમઙ્ગુલિપઙ્ક્તિષુ ।
વક્ષસ્યધોક્ષજં ન્યસ્ય શ્રીવત્સં તસ્ય મધ્યતઃ ॥ ૨૩॥

સ્તનયોરનિરુદ્ધં ચ દામોદરમથોદરે ।
પદ્મનાભં તથા નાભૌ નાભ્યધશ્ચાપિ કેશવમ્ ॥ ૨૪॥

મેઢ્રે ધરાધરં દેવં ગુદે ચૈવ ગદાગ્રજમ્ ।
પીતામ્બરધરં કટ્યામૂરુયુગ્મે મધુદ્વિષમ્ ॥ ૨૫॥

મુરદ્વિષં પિણ્ડકયોર્જાનુયુગ્મે જનાર્દનમ્ ।
ફણીશં ગુલ્ફયોર્ન્યસ્ય ક્રમયોશ્ચ ત્રિવિક્રમમ્ ॥ ૨૬॥

પાદાઙ્ગુષ્ઠે શ્રીપતિં ચ પાદાધો ધરણીધરમ્ ।
રોમકૂપેષુ સર્વેષુ વિષ્વક્સેનં ન્યસેદ્બુધઃ ॥ ૨૭॥

મત્સ્યં માંસે તુ વિન્યસ્ય કૂર્મં મેદસિ વિન્યસેત્ ।
વારાહં તુ વસામધ્યે સર્વાસ્થિષુ તથાઽચ્યુતમ્ ॥ ૨૮॥

દ્વિજપ્રિયં તુ મજ્જાયાં શુક્રે શ્વેતપતિં તથા ।
સર્વાઙ્ગે યજ્ઞપુરુષં પરમાત્માનમાત્મનિ ॥ ૨૯॥

એવં ન્યાસવિધિં કૃત્વા સાક્ષાન્નારાયણો ભવેત્ ।
યાવન્ન વ્યાહરેત્કિઞ્ચિત્તાવદ્વિષ્ણુમયઃ સ્થિતઃ ॥ ૩૦॥

ગૃહીત્વા તુ સમૂલાગ્રાન્કુશાંશુદ્ધાન્સમાહિતઃ ।
માર્જયેત્સર્વગાત્રાણિ કુશાગ્રૈરિહ શાન્તિકૃત્ ॥ ૩૧॥

વિષ્ણુભક્તો વિશેષેણ રોગગ્રહવિષાર્તિનઃ । (વિષાર્દિતઃ)
વિષાર્તાનાં રોગિણાં ચ કુર્યાચ્છાન્તિમિમાં શુભામ્ ॥ ૩૨॥

જપેત્તત્ર તુ ભો દેવિ સર્વરોગપ્રણાશનમ્ ।
ૐ નમઃ શ્રીપરમાર્થાય પુરુષાય મહાત્મને ॥ ૩૩॥

અરૂપબહુરૂપાય વ્યાપિને પરમાત્મને ।
વારાહં નારસિંહં ચ વામનં ચ સુખપ્રદમ્ ॥ ૩૪॥

ધ્યાત્વા કૃત્વા નમો વિષ્ણોર્નામાન્યઙ્ગેષુ વિન્યસેત્ ।
નિષ્કલ્મષાય શુદ્ધાય વ્યાધિપાપહરાય વૈ ॥ ૩૫॥

ગોવિન્દપદ્મનાભાય વાસુદેવાય ભૂભૃતે ।
નમસ્કૃત્વા પ્રવક્ષ્યામિ યત્તત્સિધ્યતુ મે વચ ॥ ૩૬॥ (વચઃ)

ત્રિવિક્રમાય રામાય વૈકુણ્ઠાય નરાય ચ ।
વારાહાય નૃસિંહાય વામનાય મહાત્મને ॥ ૩૭॥

હયગ્રીવાય શુભ્રાય હૃષીકેશ હરાશુભમ્ ।
પરોપતાપમહિતં પ્રયુક્તં ચાભિચારિણમ્ ॥ ૩૮॥ (ચાભિચારિણામ્)

ગરસ્પર્શમહારોગપ્રયોગં જરયા જર ।
નમોઽસ્તુ વાસુદેવાય નમઃ કૃષ્ણાય ખડ્ગિને ॥ ૩૯॥

નમઃ પુષ્કરનેત્રાય કેશવાયાઽઽદિચક્રિણે ।
નમઃ કિઞ્જલ્કવર્ણાય પીતનિર્મલવાસસે ॥ ૪૦॥

મહાદેવવપુઃસ્કન્ધધૃષ્ટચક્રાય ચક્રિણે ।
દંષ્ટ્રોદ્ધૃતક્ષિતિતલત્રિમૂર્તિપતયે નમઃ ॥ ૪૧॥

મહાયજ્ઞવરાહાય શ્રીવિષ્ણવે નમોઽસ્તુ તે ।
તપ્તહાટકકેશાન્તજ્વલત્પાવકલોચન ॥ ૪૨॥

વજ્રાધિકનખસ્પર્શદિવ્યસિંહ નમોઽસ્તુ તે ।
કશ્યપાયાતિહ્રસ્વાય ઋગ્યજુઃસામલક્ષણ ॥ ૪૩॥

તુભ્યં વામનરૂપાય ક્રમતે ગાં નમો નમઃ ।
વારાહાશેષદુઃખાનિ સર્વપાપફલાનિ ચ ॥ ૪૪॥

મર્દ મર્દ મહાદંષ્ટ્ર મર્દ મર્દ ચ તત્ફલમ્ ।
નરસિંહ કરાલાસ્યદન્તપ્રાન્ત નખોજ્જ્વલ ॥ ૪૫॥

ભઞ્જ ભઞ્જ નિનાદેન દુઃખાન્યસ્યાઽઽર્તિનાશન ।
ઋગ્યજુઃસામભિર્વાગ્ભિઃ કામરૂપધરાદિધૃક્ ॥ ૪૬॥

પ્રશમં સર્વદુઃખાનિ નય ત્વસ્ય જનાર્દન ।
ઐકાહિકં વ્યાહિકં ચ તથા ત્રિદિવસં જ્વરમ્ ॥ ૪૭॥

ચાતુર્થિકં તથાઽનુગ્રં તથા વૈ સતતજ્વરમ્ ।
દોષોત્થં સન્નિપાતોત્થં તથૈવાઽઽગન્તુકજ્વરમ્ ॥ ૪૮॥

શમં નયતુ ગોવિન્દો ભિત્ત્વા છિત્ત્વાઽસ્ય વેદનમ્ ।
નેત્રદુઃખં શિરોદુઃખં દુઃખં તૂદરસમ્ભવમ્ ॥ ૪૯॥

અનુચ્છ્વાસં મહાશ્વાસં પરિતાપં તુ વેપથુમ્ ।
ગુદઘ્રાણાઙ્ઘ્રિરોગાંશ્ચ કુષ્ઠરોગં તથા ક્ષયમ્ ॥ ૫૦॥

કામલાદીંસ્તથા રોગાન્પ્રમેહાદીંશ્ચ દારુણાન્ ।
યે વાતપ્રભવા રોગા લૂતાવિસ્ફોટકાદયઃ ॥ ૫૧॥

તે સર્વે વિલયં યાન્તુ વાસુદેવાપમાર્જિતાઃ ।
વિલયં યાન્તિ તે સર્વે વિષ્ણોરુચ્ચારણેન વા ॥ ૫૨॥

ક્ષયં ગચ્છન્તુ ચાશેષાસ્તે ચક્રાભિહતા હરેઃ ।
અચ્યુતાનન્તગોવિન્દનામોચ્ચારણભેષજાત્ ॥ ૫૩॥

નશ્યન્તિ સકલા રોગાઃ સત્યં સત્યં વદામ્યહમ્ ।
સ્થાવરં જઙ્ગમં યચ્ચ કૃત્રિમં ચાપિ યદ્વિષમ્ ॥ ૫૪॥

દન્તોદ્ભવં નખોદ્ભૂતમાકાશપ્રભવં ચ યત્ ।
ભૂતાદિપ્રભવં યચ્ચ વિષમત્યન્તદુઃસહમ્ ॥ ૫૫॥

શમં નયતુ તત્સર્વં કીર્તિતોસ્ય જનાર્દનઃ ।
ગ્રહાન્પ્રેતગ્રહાંશ્ચૈવ તથાઽન્યાંશાકિનીગ્રહાન્ ॥ ૫૬॥

મુખમણ્ડલકાન્કૂરાન્રેવતીં વૃદ્ધરેવતીમ્ ।
વૃદ્ધિકાખ્યાન્ગ્રહાંશ્ચોગ્રાંસ્તથા માતૃગ્રહાનપિ ॥ ૫૭॥

બાલસ્ય વિષ્ણોશ્ચરિતં હન્તિ બાલગ્રહાનપિ ।
વૃદ્ધાનાં યે ગ્રહાઃ કેચિદ્બાલાનાં ચાપિ યે ગ્રહાઃ ॥ ૫૮॥

નૃસિંહદર્શનાદેવ નશ્યન્તે તત્ક્ષણાદપિ ।
દંષ્ટ્રાકરાલવદનો નૃસિંહો દૈત્યભીષણઃ ॥ ૫૯॥

તં દૃષ્ટ્વા તે ગ્રહાઃ સર્વે દૂરં યાન્તિ વિશેષતઃ ।
નરસિંહ મહાસિંહ જ્વાલામાલોજ્જ્વલાનન ॥ ૬૦॥

ગ્રહાનશેષાન્સર્વેશ નુદ સ્વાસ્યવિલોચન ।
યે રોગા યે મહોત્પાતા યદ્વિષં યે મહાગ્રહાઃ ॥ ૬૧॥

યાનિ ચ ક્રૂરભૂતાનિ ગ્રહપીડાશ્ચ દારુણાઃ ।
શસ્ત્રક્ષતેષુ યે રોગા જ્વાલાગર્દભકાદયઃ ॥ ૬૨॥

વિસ્ફોટકાદયો યે ચ ગ્રહા ગાત્રેષુ સંસ્થિતાઃ ।

ત્રૈલોક્યરક્ષાકર્તસ્ત્વં દુષ્ટદાનવવારણ ॥ ૬૩॥

સુદર્શનમહાતેજશ્છિન્ધિ ચ્છિન્ધિ મહાજ્વરમ્ ।
છિન્ધિ વાતં ચ લૂતં ચ ચ્છિન્ધિ ઘોરં મહાવિષમ્ ॥ ૬૪॥

ઉદ્દણ્ડામરશૂલં ચ વિષજ્વાલાસગર્દભમ્ ।
ૐ હ્રાંહ્રાંહૂંહૂં પ્રધારેણ કુઠારેણ હન દ્વિષઃ ॥ ૬૫॥

ૐ નમો ભગવતે તુભ્યં દુઃખદારણવિગ્રહ ।
યાનિ ચાન્યાનિ દુષ્ટાનિ પ્રાણિપીડાકરાણિ વૈ ॥ ૬૬॥

તાનિ સર્વાણિ સર્વાત્મા પરમાત્મા જનાર્દનઃ ।
કિઞ્ચિદ્રૂપં સમાસ્થાય વાસુદેવ નમોઽસ્તુ તે ॥ ૬૭॥

ક્ષિપ્ત્વા સુદર્શનં ચક્રં જ્વાલામાલાવિભીષણમ્ ।
સર્વદુષ્ટોપશમનં કુરુ દેવવરાચ્યુત ॥ ૬૮॥

સુદર્શન મહાચક્ર ગોવિન્દસ્ય વરાયુધ ।
તીક્ષ્ણધાર મહાવેગ સૂર્યકોટિસમદ્યુતે ॥ ૬૯॥

સુદર્શન મહાજ્વાલ ચ્છિન્ધિ ચ્છિન્ધિ મહારવ ।
સર્વદુઃખાનિ રક્ષાંસિ પાપાનિ ચ વિભીષણ ॥ ૭૦॥

દુરિતં હન ચાઽઽરોગ્યં કુરુ ત્વં ભોઃ સુદર્શન ।
પ્રાચ્યાં ચૈવ પ્રતીચ્યાં ચ દક્ષિણોત્તરતસ્તથા ॥ ૭૧॥

રક્ષાં કરોતુ વિશ્વાત્મા નરસિંહઃ સ્વગર્જિતૈઃ ।
ભૂમ્યન્તરિક્ષે ચ તથા પૃષ્ઠતઃ પાર્શ્વતોઽગ્રતઃ ॥ ૭૨॥

રક્ષાં કરોતુ ભગવાન્બહુરૂપી જનાર્દનઃ ।
(તથા વિષ્ણુમયં સર્વં સદેવાસુરમાનુષમ્) ॥ ૭૩॥

તેન સત્યેન સકલં દુઃખમસ્ય પ્રણશ્યતુ ।
યથા યોગેશ્વરો વિષ્ણુઃ સર્વવેદેષુ ગીયતે ॥ ૭૪॥

તેન સત્યેન સકલં દુઃખમસ્ય પ્રણશ્યતુ ।
પરમાત્મા યથા વિષ્ણુર્વેદાઙ્ગેષુ ચ ગીયતે ॥ ૭૫॥

તેન સત્યેન વિશ્વાત્મા સુખદસ્તસ્ય કેશવઃ ।
શાન્તિરસ્તુ શિવં ચાસ્તુ પ્રણાશં યાતુ ચાસુખમ્ ॥ ૭૬॥

વાસુદેવશરીરોત્થૈઃ કુશૈઃ સમ્માર્જિતં મયા ।
અપામાર્જિતગોવિન્દો નરો નારાયણસ્તથા ॥ ૭૭॥

તથાઽપિ સર્વદુઃખાનાં પ્રશમો વચનાદ્ધરેઃ ।
શાન્તાઃ સમસ્તદોષાસ્તે ગ્રહાઃ સર્વે વિષાણિ ચ ।
ભૂતાનિ ચ પ્રશામ્યન્તિ સંસ્મૃતે મધુસૂદને ॥ ૭૮॥

એતે કુશા વિષ્ણુશરીરસમ્ભવા
જનાર્દનોઽહં સ્વયમેવ ચાગ્રતઃ ।
હતં મયા દુઃખમશેષમસ્ય વૈ
સ્વસ્થો ભવત્વેષ વચો યથા હરેઃ ॥ ૭૯॥

શાન્તિરસ્તુ શિવં ચાસ્તુ પ્રણશ્યત્વસુખં ચ યત્ ।
યદસ્ય દુરિતં કિઞ્ચિત્ક્ષિપ્તં તલ્લવણામ્ભસિ ॥ ૮૦॥

સ્વાસ્થ્યમસ્ય સદૈવાસ્તુ હૃષીકેશસ્ય કીર્તનાત્ ।
યદ્યતોઽત્ર ગતં પાપં તત્તુ તત્ર પ્રગચ્છતુ ॥ ૮૧॥

એતદ્રોગેષુ પીડાસુ જન્તૂનાં હિતમિચ્છુભિઃ ।
વિષ્ણુભક્તૈશ્ચ કર્તવ્યમપામાર્જનકં પરમ્ ॥ ૮૨॥

અનેન સર્વદુઃખાનિ વિલયં યાન્ત્યશેષતઃ ।
સર્વપાપવિશુદ્ધ્યર્થં વિષ્ણોશ્ચૈવાપમાર્જનાત્ ॥ ૮૩॥

આર્દ્રં શુષ્કં લઘુ સ્થૂલં બ્રહ્મહત્યાદિકં તુ યત્ ।
તત્સર્વં નશ્યતે તૂર્ણં તમોવદ્રવિદર્શનાત્ ॥ ૮૪॥

નશ્યન્તિ રોગા દોષાશ્ચ સિંહાત્ક્ષુદ્રમૃગા યથા ।
ગ્રહભૂતપિશાચાદિ શ્રવણાદેવ નશ્યતિ ॥ ૮૫॥

દ્રવ્યાર્થં લોભપરમૈર્ન કર્તવ્યં કદાચન ।
કૃતેઽપામાર્જને કિઞ્ચિન્ન ગ્રાહ્યં હિતકામ્યયા ॥ ૮૬॥

નિરપેક્ષૈઃ પ્રકર્તવ્યમાદિમધ્યાન્તબોધકૈઃ ।
વિષ્ણુભક્તૈઃ સદા શાન્તૈરન્યથાઽસિદ્ધિદં ભવેત્ ॥ ૮૭॥

અતુલેયં નૃણાં સિદ્ધિરિયં રક્ષા પરા નૃણામ્ ।
ભેષજં પરમં હ્યેતદ્વિષ્ણોર્યદપમાર્જનમ્ ॥ ૮૮॥

ઉક્તં હિ બ્રહ્મણા પૂર્વં પૌ(પુ)લસ્ત્યાય સુતાય વૈ ।

એતત્પુલસ્ત્યમુનિના દાલભ્યાયોદિતં સ્વયમ્ ॥ ૮૯॥

સર્વભૂતહિતાર્થાય દાલભ્યેન પ્રકાશિતમ્ ।
ત્રૈલોક્યે તદિદં વિષ્ણોઃ સમાપ્તં ચાપમાર્જનમ્ ॥ ૯૦॥

તવાગ્રે કથિતં દેવિ યતો ભક્તાઽસિ મે સદા ।
શ્રુત્વા તુ સર્વં ભક્ત્યા ચ રોગાન્દોષાન્વ્યપોહતિ ॥ ૯૧॥

ઇતિ શ્રીમહાપુરાણે પાદ્મે ઉત્તરખણ્ડે ઉમામહેશ્વરસંવાદે
(દાલભ્યપુલસ્ત્યસંવાદે) વિષ્ણોરપામાર્જનસ્તોત્રં સમ્પૂર્ણમ્ ।
(અપામાર્જનસ્તોત્રસ્તોત્રકથનં નામોનાશીતિતમોઽધ્યાયઃ ॥ ૭૯/૮૦ ॥)

અથાશીતિતમોઽધ્યાયઃ ।
મહાદેવ ઉવાચ-
અપામાર્જનકં દિવ્યં પરમાદ્ભુતમેવ ચ ।
પઠિતવ્યં વિશેષેણ પુત્રકામાર્થસિદ્ધયે ॥ ૧॥

એતત્સ્તોત્રં પઠેત્પ્રાજ્ઞઃ સર્વકામાર્થસિદ્ધયે ।
એકકાલં દ્વિકાલં વા યે પઠન્તિ દ્વિજાતયઃ ॥ ૨॥

આયુશ્ચ શ્રીર્બલં તેષાં વૃદ્ધિં યાન્તિ દિને દિને ।
બ્રાહ્મણો લભતે વિદ્યાં ક્ષત્રિયો રાજ્યમેવ વા ॥ ૩॥

વૈશ્યો ધનસમૃદ્ધિં ચ શૂદ્રો ભક્તિં ચ વિન્દતિ ।
અન્યશ્ચ લભતે ભક્તિ પઠનાચ્છ્રવણાજ્જપાત્ ॥ ૪॥

સામવેદફલં તસ્ય જાયતે નગનન્દિનિ ।
અખિલઃ પાપસઙ્ઘાતસ્તત્ક્ષણાદેવ નશ્યતિ ॥ ૫॥

ઇતિ જ્ઞાત્વા તુ ભો દેવિ પઠિતવ્યં સમાહિતૈઃ ।
પુત્રાર્થૈવ તથા લક્ષ્મીઃ સમ્પૂર્ણા ભવતિ ધ્રુવમ્ ॥ ૬॥

લિખિત્વા ભૂર્જપત્રે તુ યો ધારયતિ વૈષ્ણવઃ ।
ઇહ લોકે સુખં ભુક્ત્વા યાતિ વિષ્ણોઃ પરં પદમ્ ॥ ૭॥

પઠિત્વા શ્લોકમેકં તુ તુલસીં યઃ સમર્પયેત્ ।
સર્વ તીર્થે કૃતં તેન તુલસ્યાઃ (સ્યા) પૂજને કૃતે ॥ ૮॥

એતત્સ્તોત્રં તુ પરમં વૈષ્ણવં મુક્તિદાયકમ્ ।
પૃથિવીદાનમાત્રેણ વિષ્ણુલોકં તુ ગચ્છતિ ॥ ૯॥

જપેત્સ્તોત્રં વિશેષેણ વિષ્ણુલોકસ્ય વાઞ્છયા ।
બાલાનાં જીવનાર્થાય પઠિતવ્યં સમાહિતૈઃ ॥ ૧૦॥

રોગગ્રહાભિભૂતાનાં બાલાનાં શાન્તિકારકમ્ ।
ભૂતગ્રહવિષં ચૈવ પઠનાદેવ નશ્યતિ ॥ ૧૧॥

કણ્ઠે તુલસિજાં માલાં ધૃત્વા વિમો હિ યઃ પઠેત્ ।
સ ચ વૈ વૈષ્ણવો જ્ઞેયો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૧૨॥

કણ્ઠે માલા ધૃતા યેન શઙ્ખચક્રાદિચિહ્નિતઃ ।
વૈષ્ણવઃ પ્રોચ્યતે વિપ્રઃ સ્તોત્રં ચૈતત્પઠન્સદા ॥ ૧૩॥

ઇહલોકં પરિત્યજ્ય વિષ્ણુલોકં સ ગચ્છતિ ।
મોહમાયાપરિત્યક્તો દમ્ભતૃષ્ણાવિવર્જિતઃ ॥ ૧૪॥

એતત્સ્તોત્રં પઠન્દિવ્યં પરં નિર્વાણમાપ્નુયાત્ ।
તે ધન્યાઃ સન્તિ ભૂર્લોકે યે વિમા વૈષ્ણવાઃ સ્મૃતાઃ ॥ ૧૫॥

સ્વાત્મા વૈ તારિતસ્તૈસ્તુ સકુલો નાત્ર સંશયઃ ।
તે વૈ ધન્યતમા લોકે નારાયણપરાયણાઃ ।
તૈર્ભક્તિશ્ચ સદા કાર્યા તે વૈ ભાગવતા નરાઃ ॥ ૧૬॥

ઇતિ શ્રીમહાપુરાણે પાદ્મે ઉત્તરખણ્ડે ઉમામહેશ્વરસંવાદેઽપામાર્જનમહિમકથનં
નામાશીતિતમોઽધ્યાયઃ ॥ ૮૦/૮૧॥

Proofread by NA

*Apamarjanastotram 2 Mahimasahitam*

pdf was typeset on December 27, 2023

Please send corrections to *sanskrit@cheerful.com*